"अणेगहा कुसीले, तं जहा-नाणकुसीले १ दंसणकुसीले २ चारित्तकुसीले ३ तवकुसीले वीरियकुसीले इति"

निर्ग्रन्थमध्योक्तकुशीलश्च श्रीभगवत्यां ज्ञानदर्शनचारित्रतपसां विराधको मनसा क्रोधाद्यासेवकश्च पञ्चधोक्तः। एवं च ज्ञानदर्शनचारित्राणि विराधयन् कुशील इत्युच्यते। इति तत्त्वतो द्वयोरपि लक्षणमेकमेव। श्रीमहानिशीथे च-

एवं अट्ठरसण्हं सीलंगसहस्साणं जो जत्थ पए पमत्ते भविज्जा। से णं तेणं पमायदोसे णं कुसीलेणो य।

इति सूक्ष्मविराधकस्याप्यवन्द्यकुशीलत्वेनोक्तेर्बकुशकुशीलानां निर्ग्रन्थानामपि श्रीभगवत्यामुत्तरगुणज्ञानादिविराधकत्वेनोक्तानां कथं नावन्द्यकुशीलत्वं, तेषां च तथात्वे शासनोच्छेद एव । यतः—

न विणा तित्थं निअंठेहिं नातित्था य निअंठया ।
छक्कायसंजमो जाव ताव अणुसज्जणा दुण्हं ॥१॥
सव्वजिणाणं निच्चं बउसकुसीलेहिं वट्टए तित्थं ॥

इति...........ततः पार्श्वस्थादीनामेकान्तेनावन्द्यत्वाक्षराणि भयवाक्यतयैव स्वीकर्त्तव्यानि, नमस्काराद्युपधानवाक्यवत्, भयवाक्यं च श्रुत्वा मन्दसंवेगोऽपि तीव्रश्रद्धः स्यात् । एवं च—

पासत्थो ओसन्नो० ॥ १ ॥
कुसीलोसन्नपासत्थो सच्छंदे सिढिले तहा ।
दिट्ठीए वि इमे पंच गोयमा ! न निरिक्खए ॥२॥
असुइट्ठाणे अडिआ० ॥ ३ ॥ इत्यादि

वाक्यानि भयवाक्यत्वेन पार्श्वस्थत्वादिकारणशय्यातरपिण्डदानादित्याजनपराणि पार्श्वस्थादिसंसर्गनिषेधनपराणि च बोद्धव्यानि ।

नतु तेषां सर्वथा अवंद्यत्वख्यापनपराणि । यथा हि लोके दुर्विनीतं पुत्रादिकं प्रति एतस्य भोजनं न दातव्यमित्यादिवाक्यानि दुर्विनयशिक्षणपराणि नतु भोजननिषेधपराणि । यतः श्रीधर्मरत्नप्रकरणे—

विहि[१]उज्जम वण्णय भय उस्सग्ग ववायतदुभयगयाइं।
सुत्ताइं बहुविहाइं समए गंभीरभावाइं ॥ १ ॥

---

१टीका—विधिश्चोद्यमश्च वर्णकश्च भयं चोत्सर्गश्चापवादश्च तदुभयं चेति द्वन्द्वः, तस्य च स्वपदप्रधानत्वाद्गतानीति प्रत्येकमभिसंबध्यते । सूत्राणि च विशेष्याणि । ततश्चैवं योज्यते कानिचिद्विधिगतानि सूत्राणि समये सन्ति । यथा—"संपत्ते भिक्खकालंमि असंभंतो अमुच्छिओ । इमेण कमजोएण भत्तपाणं गवेसए ॥ १ ॥" इत्यादीनि पिण्डग्रहणविधिज्ञापकानि । उद्यमसूत्राणि—"दुमपत्तए पंडुयए जहा निवडइ राइगणाण अच्चए । एवं मणुयाण जीवियं समयं गोयम ? मा पमायए ॥ १ ॥" इत्यादीनि । तथा—"वंदइ उभओ कालंपि चेइयाइं थयथुईपरमो । जिणवरपडिमा घरधूयपुप्फगंधच्चणे जुत्तो ॥१॥" कालनिरूपणस्योद्यमहेतुत्वान्न पुनरन्यदाऽपि चैत्यवन्दनं न धर्मायेति । वर्णकसूत्राणि चरितानुवादरूपाणि । यथा—द्रौपद्या पुरुषपञ्चकस्य वरमालानिक्षेपः, ज्ञाताधर्मकथाद्यङ्गेषु नगरादिवर्णकरूपाणि च वर्णकसूत्राणि । भयसूत्राणि नारकादिदुःखदर्शकानि । उक्तं च—"नरएसु मंसरुहिराइवन्नणं जं पसिद्धिमेत्तेण । भयहेउ इहर तेसिं वेउव्वियभावओ न तयं ॥ १ ॥" अथवा दुःखविपाकेषु पापकारिणां चरितकथनानि भयसूत्राणि । तद्भयात्प्राणिनां पापनिवृत्तिसंभवात् । उत्सर्गसूत्राणि—"इच्चेसिं छण्हं जीवनिकायाणं नेव सयं दंडं समारंभेज्जा ॥" इत्यादिषड्जीवनिकायरक्षाविधायकानि । अपवादसूत्राणि प्रायश्छेदग्रन्थगम्यानि । यद्वा—"न यालभेज्जा निउणं सहायं गुणाहियं वा गुणओ समं वा । एक्कोवि पावाइं विवज्जयंतो विहरेज्ज कामेसु असज्ज

एसिं विसयविभागं अमुणंतो नाणवरणकम्मुदया ।
मुज्झइ जीवो तत्तो सपरेसिमसग्गहं जणइ ॥२॥

इति । किञ्च–यदि पार्श्वस्थादिसङ्गतिनिषेधकवाक्यानि, न भयवाक्यतया अङ्गी क्रियन्ते, किन्तु विधिवाक्यतयैव । तदानीं श्रीआवश्यके श्रीसम्यक्त्वदंडके तदतीचारपञ्चके च परतीर्थिकाणामालापान्नदानप्रशंसादिवर्जनवत्पार्श्वस्थादीनामपि तद्वर्जनं कृतमभविष्यत् । चतुर्विधमिथ्यात्वे च लोकोत्तरं गुरुगतं मिथ्यात्वं, (लिंगधारिस्वरूपं) तथाहि—

"[1]दगपाणं पुप्फफलं अणेसणिज्जं गिहत्थकिच्चाइं ।
अजया पडिसेवंती जइ वेसविडंबगा नवरं ॥१॥"
[2]उसन्नया अबोही पवयण उब्भावणा य बोहिओ ।

माणो ' १ ॥ " इत्यादीन्यपि । तदुभयसूत्राणि येषूत्सर्गापवादौ युगपत्कथ्येते । यथा–"अट्टज्झाणाभावे सम्मं अहियासियव्वओ वाही । तब्भावम्मि उ विहिणा पडियारपवत्तणं नेयं ॥१॥" एवं 'सूत्राणि बहुविधानि' स्वसमयपरसमयनिश्चयव्यवहारज्ञानक्रियादिना नयमतप्रकाशकानि 'समये' सिद्धान्ते 'गम्भीरभावानि' महामतिगम्याभिप्रायाणि सन्तीति शेषः ॥ १ ॥

१ व्या०—'दगपाणं इति' दगपाणं शब्देन सचित्तजलपानं पुष्पं जात्यादीनां, फलमाम्रादीनां, 'अणेसणिज्जं इति' आधाकर्मादिदोषदुष्टमाहारादि, अयता असंयताः प्रतिसेवन्ते प्रतिकूलमाचरन्ति, नवरं केवलं ते वेषविडंबका एव, न तु स्वल्पमपि परमार्थसाधका इत्यर्थः ॥

२ व्या० 'उसन्नया इति' एतादृशानां भ्रष्टाचाराणामवसन्नता पराभवो भवति, अबोधिर्धर्मप्राप्त्यभावः स्यात् । यतः प्रवचनस्य,

ओसन्नो वि वरं पिहु पवयण उब्भावणापरमो ॥२॥
गुणहीणो गुणरयणा--यरेसु जो कुणइ तुल्लमप्पाणं ।
सुतवस्सिणो अ हीलइ सम्मत्तं कोमलं तस्स ॥३॥
उसन्नस्स गिहिस्स व जिणपवयणतिव्वभावियमइस्स ।
कीरइ जं अणवज्जं दढसम्मत्तस्स वत्थासु ॥ ४ ॥
पासत्थोसन्नकुसील--नायसंसत्तं जणं महाछंदं ।

---

१ शासनस्योद्भावनायां प्रभावनायां वर्द्धितायां सत्यां बोधिरूपं फलं भवति, नतु प्रवचनहीलनायां कृतायामित्यर्थः। 'उसन्नोवित्ति' अवसन्नोऽपि कर्मपारवश्येन शिथिलाचारोऽपि वरं श्रेष्टः, यदि 'पिहुत्ति' पृथुपृथुतरं यथास्यात्तथा प्रवचनस्य शासनस्योद्भावना प्रभावना शोभेति यावत्, तस्यां परमः प्रधानो भवति, व्याख्यानादिना शासनप्रभावकोऽवसन्नोऽपि वरमित्यर्थः ॥

२ व्या० 'गुणहीणो इति' गुणेन चारित्रादिना हीन एतादृशो गुणरत्नाकरैर्गुणसमुद्रैः साधुभिः सार्धं यः स्वकीयमात्मानं तुल्यं करोति, वयमपि साधव इति मन्यन्ते, तस्य पुरुषस्य सम्यक्त्वं कोमलमसारमर्थात्स मिथ्यादृष्टिरित्यर्थः ॥

३ व्या० 'उसन्नस्सेति' अवसन्नस्य पार्श्वस्थादिकस्य वाऽथवा गृहस्थस्य, कीदृशस्य ? जिनस्तीर्थंकरस्तस्य प्रवचने सिद्धान्ते धर्मेण तीव्रभाविता मतिर्यस्य तस्य जिनधर्मरागरक्तस्यैतादृशस्याऽवसन्नस्य श्रावकस्य वा यद्वैयावृत्यादि क्रियते, तत्सर्वमनवद्यं निष्पापं निर्दूषणमिति यावत्, कीदृशस्य ? दृढसम्यक्त्वस्य निश्चलदर्शनस्य कदा वैयावृत्यादि करोति ? अवस्थासु क्षेत्रकालाद्यवस्थासु ॥

४ व्या० 'पासत्थो इति' पार्श्वे ज्ञानदर्शनचारित्राणां समीपे तिष्ठतीति पार्श्वस्थः, अवसन्नश्चारित्रविषये शिथिलाचारः कुशीलः नायशब्देन यो न भणनाद् ज्ञानविराधकः, 'संसत्तं जणं इति'

[१]नाऊणं तं सुविहिया सव्वपयत्तेण वज्जंति ॥ ॥५॥
बायालमेसणाओ न रक्खइ धाइसिज्जपिंडं च ।
आहारेइ अभिक्खं विगइ उ सन्निहिं खाइ ॥१॥
सुर[३]प्पमाणभोजी आहारेइ अभिक्खमाहारं ।
नय मंडलीइं भुंजइ नय भिक्खं हिंडइ अलसो ॥२॥
कीवो न[४] कुणइ लोअं लज्जइ पडिमाइ्ज्जलमवणेइ ।
सोवाहणो अ हिंडइ बंधइ कडिपट्टयमकज्जे ॥३॥

---

१संसक्तो, यो यत्र यादृशो मिलति, तत्र तत्सगत्या तादृशो भवति स संसक्त इत्युच्यते, यथाछंदः स्वकीयमत्योत्सूत्रप्ररूपकः, एतेषां स्वरूपं ज्ञात्वा सुविहिताः शोभनानुष्ठानाः साधवस्तं पार्श्वस्थादिकं सर्वप्रयत्नेन सर्वशक्त्या वर्जयन्ति तत्सङ्गतिं न कुर्वन्ति चारित्रविनाशकारित्वादित्यर्थः ॥

अथ पार्श्वस्थादीनां लक्षणानि कथयति—

२ व्या० 'बायाल इति' द्विचत्वारिंशत्संख्याका एषणा इति आहारविषया गवेषणास्तान् न रक्षति, न पालयति, आहारदोषान्न निवारयतीत्यर्थः, च पुनर्धात्रीपिण्डं न रक्षति, न निवारयति, 'सिज्जत्ति' शय्यातरपिण्डं गृण्हाति, अभीक्ष्णं पुनः पुनर्विकृतीर्दुग्धदधिप्रमुखाः कारणं विनाऽऽहारयति' 'सन्निहिं इति' रात्रावथवा रात्रिरक्षितं वस्तु खादति भक्षयतीत्येवंशीलः ॥

३ व्या० 'सूर इति' सूर्यप्रमाणं उदयादारभ्याऽस्तं यावद्भुङ्क्ते इत्येवंशीलः, अभीक्ष्णं निरन्तरमाहारमशनाद्याहरति भुङ्क्ते, न च साधुमंडल्यां भोजनं करोति, एकाक्येव भोजनं करोति, न च भिक्षार्थं हिंडति भ्रमति, गोचर्यां न गच्छति, अलसः सन् स्तोके एव गृहे बहुतरं गृण्हातीत्यर्थः ॥

४ व्या० 'कीवो इति' क्लीबः कातरत्वेन लोचं केशलुञ्चनं न करोति, 'पडिमा इति' कायोत्सर्गं कुर्वन् लज्जते जलं शरीरमलं हस्तेनापनयति, 'सोवाहणो अ इति' पादत्राणसहितो हिंडति, बध्नाति कटिप्रदेशे पट्टकं चोलपट्टकं 'अकज्जे इति' कार्यं विना ॥

[१]गामं देसं च कुलं, ममाए पीढफलगपडिबद्धो ।
घरसरणेसु पवज्जइ विहरइ य सकिंचणो रित्तो ॥४॥

[२]नह दंतकेसरोमे जमेइ अत्थोलधोइणो अजओ ।
वाहेइ पलिअंकं अइरेगप्पमाणमच्छरइ ॥५॥

[३]सोवेइ य सव्वराइं नीसट्ठमचेयणो न वा झरइ ।
न पमज्जंतो पविसइ निसिहियावस्सियं न करेइ॥६॥

---

१ व्या० 'गामं इति' ग्रामे देशे अथ च कुले 'ममाए इति' ममतया विचरति, एतानि मदीयानीति ममत्ववान् पीठफलकेषु प्रतिबद्धः वर्षाकालं विनापि शेषकाले तद्रक्षक इत्यर्थः 'घरसरणेसु इति' गृहाणां पुनर्नवीनकरणे प्रसज्यति प्रसङ्गं करोति चिन्ताकारको भवतीत्यर्थः, विहरति विहारं करोति 'सकिंचणोत्ति' सुवर्णादिद्रव्यसहितः सन् अहं रिक्तोऽस्मि, द्रव्यरहितो निर्ग्रन्थोऽस्मीति लोकानामग्रे कथयति ॥

२ व्या० 'नह इति' नखा दन्ताः केशा मस्तकसम्बन्धिनः रोमाणि शरीरसम्बन्धीनि च, एतेषां द्वन्द्वः तानि 'जमे इति' भूषयति अत्थोलशब्देन बहुपानीयेन धावनं हस्तपादादीनां यस्यैतादृशः 'अजओत्ति' अयतनया युक्तः 'वाहेइयत्ति' वाहयति गृहस्थवदुपभुङ्क्ते पल्यङ्कं मञ्चकमतिरेकप्रमाणं प्रमाणातिरिक्तं संस्तारकोत्तरपट्टाधिकमास्तरति सुखशय्यां करोतीत्यर्थः ॥५॥

३ व्या० 'सोवइय इति' स्वपिति शयनं करोति सर्वस्यां रात्रौ रात्रिप्रहरचतुष्टयेऽपीत्यर्थः निसट्ठं निर्भरमचेतनश्चेतनारहितः काष्ठवत् शयनं करोतीत्यर्थः, 'न वा झरइत्ति' रात्रौ गुणनादिकं स्वाध्यायं न करोति, रात्रौ रजोहरणादिना भूमिमप्रमार्जयन्नुपाश्रये प्रविशति, नैषेधिकीं सामाचारीं प्रवेशसमये, निर्गमनसमये वावश्यिकीं न करोति ॥

[1]पायपहे न पमज्जइ जुगमायाए न सोहए इरियं ।
पुढवीदगअगणिमारुअ--वणस्सइतसेसु निरविक्खो ॥७
[2]सव्वं थोवं उवहिं न पेहए न य करेइ सज्झायं ।
सद्दकरो झंझकरो लहुओ गणभेयतत्तिल्लो ॥८॥
खित्ताईयं[3] भुंजइ कालाईयं तहेव अविदिन्नं ।
गिण्हइ अणुइयसूरे असणाई अहव उवगरणं ॥९॥
ठवणाकुले[4] न ठवेइ पासत्थेहिं च संगयं कुणइ ।
निच्चमवज्झाणरओ न य पेहपमज्जणासीलो ॥१०॥

---

१ व्या० 'पायपहे इति' पहेति पथि मार्गे व्रजन्, ग्रामसोऽम्न प्रविशन् निस्सरन् वा न पादौ चरणौ प्रमार्जयति, "युगमात्रायां" युगप्रमाणायां भूमौ इर्यां न शोधयति, पृथ्वी शब्देन पृथ्वीकायः, दगशब्देनाप्कायः अगणिशब्देन तेजस्कायः मारुतो वायुकायः वनस्पतिकायत्रसकायश्च, एतेषु षट्सु जीवनिकायेषु निरपेक्षोऽपेक्षारहितो विराधयन्न शङ्कते इत्यर्थः ॥

२ व्या० 'सव्वं इति' सर्वं स्तोकमप्युपधि मुखवस्त्रिकामात्रमपि न प्रेक्षते, न प्रतिलेखते, न च करोति स्वाध्यायं वाचनादिकं, रात्रौ शयनानन्तरं गाढं शब्दं करोतीति, झंझशब्देन कलहस्तं करोतीति, लघुको नतु गम्भीरो न गुणयुक्त', गणस्य संघाटकस्य भेदे भेदकरणे 'तत्तिल्लोत्ति' तत्परः ॥

३ व्या० 'खित्ताईयं इति' क्रोशद्वयादुपरिक्षेत्रादानीतमाहारं यदाहरेत्तत्क्षेत्रातीतं कालातीतमिति यदानीताहारं प्रहरत्रयानन्तरं भक्षयति, 'अणुइय सूरे इति अनुद्गते सूर्ये गृण्हाति, सूर्योदयात्प्रथममाहारं गृण्हाति, अशनादिकं चतुर्विधमाहारं, अथवोपकरणं वस्त्रादि, एवंविधः पार्श्वस्थादिः कथ्यते इत्यथः ॥

४ व्या० 'ठवणा इति' स्थापनाकुलानि वृद्धग्लानादीनामतीव भक्तिकराणि, तानि न स्थापयति न रक्षति, निष्कारणं तत्राहारार्थं गच्छतीत्यर्थः, च पुनः पार्श्वस्थैर्भ्रष्टाचारैः सार्द्धं संगतं मैत्र्यं करोति,

[1]रीयइ य दवदवाए मूढो परिभवइ तह य रायणिए।
परपरिवायं गिण्हइ निट्ठुरभासी विगहसीलो ॥११॥
विज्जं मंतं जोगं तेगिच्छं कुणइ भूइकम्मं च।
अक्खरनिमित्तजीवी आरंभपरिग्गहे रमइ ॥ १२ ॥
[३]कज्जेण विणा उग्गह--मणुजाणावेइ दिवसओ सुअइ।
अज्जियलाभं भुञ्जइ इत्थिनिसिज्जासु अभिरमइ ॥१३

---

नित्यं निरन्तरमपध्याने रतस्तत्परः न च प्रेक्ष्य दृष्ट्या विलोक्यवस्तुनो ग्रहणं प्रमार्जना रजोहरणादिकेन प्रमार्ज्य वस्तुनो भूमौ स्थापनं, तच्छीलस्तदाचरणस्वभावो नेत्यर्थः ॥

व्या० 'रीयइ य इति' गच्छति 'दवदवाए इति' सत्वरं मूर्खः सन् पराभवति 'तहय इति' तथा 'रायणिपत्ति' ज्ञानादिगुणरत्नैरधिका वृद्धास्तान्, तैः सह स्पर्द्धते इत्यर्थः, परेषां परिवादोऽवर्णवादस्तं गृण्हाति, निष्ठुरं कठिनं भाषते, इत्येवंशीलः, विकथा राजकथाद्यास्तासां शीलः स्वभावो यस्य सः ॥

व्या० 'विज्जं इति' विद्यां देवाधिष्ठितां, मंत्रं देवाधिष्ठितं योगमदृश्यीकरणादि, 'तेगिच्छं इति, रोगप्रतिक्रियां करोति, च पुनर्भूतिकर्मेति रक्षाद्यभिमंत्र्य गृहस्थेभ्यः समर्पयति, अक्षरशब्देन लेखकानामक्षरविद्याप्रदानं, निमित्तं शुभाशुभयोर्लग्नबलेन प्रकाशनं, तेन जीवतीत्येवंशीलः आरम्भः पृथिव्याद्युपमर्द्दः, परिग्रहोऽधिकोपकरणरक्षणं, तत्र रमते तत्रासक्त इत्यर्थः ॥

व्या० 'कज्जेण इति' कार्येण विना निरर्थकमित्यर्थः, अवग्रहं स्थित्यर्थमनुज्ञापयति, गृहस्थानां भूमिकां ज्ञापयित्वा मुञ्चतीत्यर्थः, दिवसे स्वपिति निद्रां करोति आर्यिकाया लाभं साध्वोलब्धमाहारं भुनक्ति, स्त्रीणां निषद्या आसनानि, तत्राभिरमते, स्त्रीणामुत्थानानन्तरं तत्कालमेव तत्र तिष्ठतीत्यर्थः ॥

[1]उच्चारे पासवणे खेले सिंघाणए अणाउत्तो ।
संथारगणवहीणं पडिक्कमइ सवासपाउरणो ॥ १४ ॥
[2]न करेइ पहे जइणं तलिआणं तह करेइ परिभोगं ।
चरइ अणुबद्धवासो स पक्खपरपक्खओमाणो ॥१५॥
[3]संजोअइ अ बहुअं इंगालसाधूमगं अणट्ठाए ।
भुञ्जइ रूवबलट्ठा न धरेइ अ पायपुंछणयं ॥१६॥
[4]अट्ठमछट्ठचउत्थं संवच्छरचाउमासपक्खेसु ।

---

व्या० 'उच्चारे इति' उच्चारो मलस्तत्र, प्रस्रवणं मूत्रं तत्र तत्परिष्ठापने इत्यर्थः, खेलशब्देन श्लेष्म तत्र 'सिंघाणएत्ति' नासिकामलेऽनायुक्तोऽवसावधानः, अयतनया तत्परिष्ठापक इत्यर्थः संस्तारकस्योपरि स्थित एव प्रतिक्रमणं करोति कीदृशः ? वासो वस्त्रं तस्य प्रावरणं प्रकर्षेण वेष्टनं, तेन सह वर्त्तमानः, अथवा स इति भिन्नं पदं वा अथवेत्यर्थः, संप्रावरण इति विशेषणम् ॥

व्या० 'न करेइ इति' न करोति पथि मार्गे यतनां 'तलियाणंति' पादतलरक्षकाणां पादत्राणभेदानां परिभोगमुपभोगं करोति, चरति गच्छति 'अणुबद्धवासे' वर्षाकालेऽपि विहारं करोति, स्वपक्षाणां साधूनां मध्ये परपक्षाणामन्यदर्शनिनां मध्येऽपमाने सति अयोग्यं विचारयतीत्यर्थः ॥

व्या० 'संजोअइ इति' संयोजयति भिन्नभिन्नस्थितानां द्रव्याणां आस्वादार्थं संयोगं करोतीत्यर्थः, अतिबहुकं भुंक्ते इंगाल शब्देन समीचीनं भक्तादि रागबुद्धया जेमति, 'साधूमगं इति' अनिष्टभक्तादिमुखविकारेण जेमति, 'अणट्ठाए इति' क्षुधावेदनीयवैयावृत्त्यादिकारणं विना 'भुंजइति' भोजनं करोति, किमर्थं ? रूपबलनिमित्तं इति 'न धरेइत्ति' न धारयति च पादप्रोंछनकम् ॥

व्या० 'अट्ठम इति' अष्टमं तपः षष्टं तपश्चतुर्थं तपश्च न करोति, कस्मिन् कस्मिन् दिने ? तदाह—सांवत्सरिके पर्वणि अष्टमं चातुर्मासिके षष्ठं, पक्षे पक्षदिवसे चतुर्दशीदिने चतुर्थं तपो,

[1]न करेइ सायबहुलो न य विहरइ मासकप्पेणं ॥१७॥
नीयं गिण्हइ[2] पिंडं एगागि अच्छए गिहत्थकहो ।
पावसुआणि अहिज्जइ अहिगारो लोगगहणम्मि ॥१८
[3]परिभवइ उग्गकारी सुद्धं मग्गं निगूहए बालो ।
विहरइ सायागुरुओ संजमविगलेसु खित्तेसु ॥ १९ ॥
उग्गा[4]इ गाइ हस्सइ असंवुडो सया करेइ कंदप्पं ।
गिहिकज्जचिंतगोवि य उसन्ने देही गिण्हइ वा॥२०॥

---

न करोति, कीदृशः सन्? सातेन बहुलः सुखशीलः सन्,न च विहरति विहारं न करोति, मासकल्पेन मासकल्पमर्यादया शेषकाले सत्यपि क्षेत्रेइत्यर्थः ॥

व्या० 'नीयं इति' नीयं नित्यमेतस्मिन गृहे एतावान् ग्राह्य इति नियतिपूर्वक पिण्डं गृण्हाति, एकाकी 'अच्छए इति' तिष्ठति, समुदाये न तिष्ठति, गृहस्थानां कथाप्रवृत्तेर्यत्र तां गृहिप्रवृत्तिं करोति, पापश्रुतानि ज्योतिर्वैदकानि 'अहिज्ज इति' अधीते पठतिं, अधिकारं करोति, लोकशब्देन लोकानां मनांसि, तेषां ग्रहणे रंजने वशीकरणे इति यावत् ॥

व्या० 'परिभवइत्ति' पराभवति, कान् ? उग्रकारिण उग्रविहारिणामुपद्रवं करोतीत्यर्थः, शुद्धं निर्दूषणं 'मग्गंति' मोक्षमार्ग निगूहयत्याच्छादयति बालो मूर्खः, 'विहरइत्ति' विचरति 'सायागुरुओत्ति' साते सौख्ये गुरुरेव गुरुकोऽर्थलिलम्पट इत्यर्थः, क्व विहरति ? संयमविकलेषु सुसाधुभिरनधिवासितेषु क्षेत्रेषु ॥

व्याख्या—उग्गाइत्ति उग्रतया महता शब्देन 'गाइत्ति' गायति, हसइत्ति' हसति, असंवृतो विकसितमुखः, 'सया इति' सदैव 'कंदप्पं इति' कन्दर्पोद्दीपकां प्रवृत्तिं करोति, अपि चेति समुच्चये, गृहिकार्यचिन्तकः, अवसन्नाय ददाति वस्त्रादि, गृण्हाति च तस्मात् ॥

धम्मकहाओ अहिज्जइ घराघरं भमइ परिकहंतो ।
अगणणाइपमाणेण य अइरित्तं वहइ उवगरणं ॥२१॥

बारस काइयत्ति य तिन्नि य उच्चारकालभूमीओ ।
अंतो बहिं च अहियासि अणहियासे न पडिलेहे ॥२२

गीयत्थं संविग्गं आयरियं मुअइ वलइ गच्छस्स ।
गुरुणो अणापुच्छा जं किंचि वि देइ गिण्हइ वा ॥२३

---

१ व्या० 'धम्मकहाओत्ति' धर्मकथा अधीते भणति, जनचित्तरञ्जनार्थमित्यर्थः, च पुनः परिकथयन धर्मकथां कथयन् गृहाद्गृहं भ्रमति गच्छति, गणनया साधूनां चतुर्द्दशसंख्यायाः साध्वीनां च पञ्चविंशतिसङ्ख्याया उपकरणानि, प्रमाणेन यादृशं कल्पते चोलपट्टकादीनां मानं तस्मादतिरिक्तमधिकं संख्यया प्रमाणेन चोपकरणं वहति धारयति ॥

२ व्या० 'बारस इति' द्वादशसङ्ख्याः 'काइयत्ति' लघुनीतियोग्याः स्थण्डिलभूमयः 'तिन्नियत्ति' तिस्र उच्चारकालग्रहणयोग्याः स्थण्डिलभूमयः, एवं सर्वा अपि सप्तविंशतिसङ्ख्याः स्थण्डिलभूमयः, उपाश्रयस्यान्तर्मध्येऽथ बहिश्च 'अहियासित्ति' यद्यध्यासितुं शक्यन्ते तदा दूरे योग्याः. 'अणहियासेत्ति' ईक्षितुं न शक्यते सा योग्या समीपवर्त्तिनी एतादृशीं भूमिकां न प्रतिलेखति नावलोकयति ॥

३ व्या० 'गीयत्थं इति' गीतार्थं सूत्रज्ञातारं 'संविग्गंति' मोक्षाभिलाषिणं, एतादृशं 'आयरियंति' स्वकीयं धर्माचार्यं 'मुअइत्ति' मुञ्चति निःकारणं त्यजति, 'वलइत्ति' वलति सम्मुखमुत्तरं ददाति, 'गच्छस्सत्ति' समुदायस्य शिक्षां ददतः सम्मुखं वदतीत्यर्थः, गुरूननापृच्छ्य गुर्वाज्ञां विनेत्यर्थः, यत्किञ्चिद्वस्तु वस्त्रादि ददाति परस्मै, वाऽथवा गृण्हाति स्वयं परस्मात् ॥

[१]गुरुपरिभोगं भुञ्जइ, सिज्जासंथारउवगरणजायं ।
कित्तियतुमंति भासइ अविणीओ गव्विओ लुद्धो॥२४॥
[२]गुरुपच्चक्खाणगिलाण--सेहबालाउलस्स गच्छस्स ।
न करेइ न य पुच्छइ निद्धम्मो लिंगमुवजीवी ॥२५॥
[३]पहगमणवसहिआहार--सयणथंडिल्लविहिपरिट्ठवणं ।
आयरइ नेव जाणइ, अज्जावट्टावणं चेव ॥ २६ ॥

---

१ व्या० 'गुरु इति' गुरुपरिभोग्यं गुरूणां परिभोग्यं भोक्तुं योग्यं स्वयं भुनक्ति, शय्या शयनभूमिः संस्तारकस्तृणादिमयः, उपकरणानि कल्पककम्बलप्रमुखाणि, तेषां जातः समुदायस्तं, गुरुभिर्भाषितः सन् 'कित्तियतुमंति' किं त्वमिति तुंकारेण भाषते, न तु भगवन् इति बहुमानपूर्वकं अविनीतः सन् गर्वितः सन् लुब्ध इति विषयादिषु लम्पटः सन एवं भाषते इत्यर्थः ॥

२ व्या० 'गुरु इति' गुरुप्रत्याख्याना अनशनादितपः कारकाः, ग्लाना रोगिणः, 'सेहत्ति' नवदीक्षिताः 'बालत्ति' लघुक्षुल्लकाः, एतैराकुलस्य भृतस्य गच्छस्य समुदायस्य न करोत्युपेक्षते वैयावृत्यादि स्वयं, नैव पृच्छति परं ज्ञातारमहं किं करोमीति 'निद्धम्मो इति' धर्मरहितः सन् लिंगस्य वेषमात्रस्योपजीवी उपजीवकः लिङ्गेनाजीविकाकारीत्यर्थः ॥

३ व्या० 'पहगमण इति' पथिमार्गे गमनं, 'वसहित्ति' उपाश्रयः स्थित्यर्थं, आहारशब्देनाहारग्रहणं शयनं; थण्डिलशब्देन स्थण्डिलशोधनं, एतेषां पदानां यो विधिस्तं, 'परिठ्ठवणंत्ति' अशुद्धभक्तादीनां परिष्ठापनं त्यजनं, एतत्सर्वं जानन्नपि निर्द्धर्मतया नाद्रियते, अथवा नैव जानाति, अज्जा शब्देन साध्वी, तस्याः वट्टावणं इति' लोकभाषया 'वर्त्ताववुं' तदपि न जानाति 'चेव इति निश्चयेन ॥

[1]च्छंदगमणउट्ठाण--सोअणो अप्पणेण चरणेण ।
समणगुणमुक्कजोगी बहुजीवखयंकरो भमइ ॥२७॥

[2]बच्छिव्व वायुपुन्नो परिभमइ जिणमयं अयाणंतो ।
थद्धो निव्विन्नाणो न य पिच्छइ किंचि अप्पसमं२८॥

[3]सच्छंदगमणउट्ठाण--सयणो भुञ्जई गिहीणं च ।
पासत्थाइठाणा हवंति एमाइया एए ॥ २९ ॥

इति उपदेशमालागाथोक्तलक्षणसर्वपार्श्वस्थाद्यसंयतवंदन एव संभाव्यते, नतु किञ्चिद्विराधकदेशपार्श्वस्थादिवन्दने । यदुक्तं-चैत्यवन्दनकुलके तदधिकारे—

---

१ व्या० 'सच्छंद इति' स्वेच्छया गमनमुत्थानमूर्ध्वीभवनं 'सोअणोत्ति' शयनं यस्यैतादृशः, अप्पणेणत्ति' आत्मना कल्पितेना चरणेनाचारेण गच्छति, श्रमणगुणा ज्ञानाद्यस्तेषां मुक्तो योगो व्यापारो येन सः, बहुजीवानां बहुप्राणिनां क्षयङ्करो विनाशकरः एतादृशो भ्रमति ॥

२ व्या० 'बच्छित्ति' बस्तिरिव वायुपूर्णः, यथा वायुपूर्णो बस्ति-दृतिरुत्फुल्लो दृश्यते, तथा गर्वेण भृतः सन् परिभ्रमणं करोति, जिनानां मतं रागादिरोगौषधमजानन् सन् स्तब्धोऽनम्रः सन निर्विज्ञानो ज्ञानरहितो न च प्रेक्षते किञ्चिल्लवलेशमपि आत्मना समं तुल्यं, एतावता सर्वानपि तृणसमान् गणयतीत्यर्थः ॥

३ व्या० 'सच्छंद इति' स्वेच्छया गमनोत्थानशयनः, अस्य विशेषणस्य पुनरुपादानं गुर्वाज्ञां विना गुणप्राप्तिर्न भवतीति ख्यापनार्थं, च पुनः 'भुंजइत्ति' भोजनं करोति गृहस्थानां मध्ये, पार्श्वस्थादीनां स्थानकानि, एते पूर्वोक्तानि पार्श्वस्थादीनां लक्षणानि भवन्तीत्यर्थः ॥

जे लोगुत्तमलिंगा लिंगिअ देहावि पुप्फतंबोलं।
आहाकम्मं सव्वं जलं फलं चेव सच्चित्तं ॥१॥
भुंजंति थीपसगं ववहारं गंथसंगहं भूसं।
एगागित्तब्भमणं सच्छंदं चिट्ठिअं वयणं ॥२॥
चेइअमठाइवासं वसहीसु वि निच्चमेव संठाणं।
गेअं निअचरणाणं अच्चावणं कणयकुसुमेहिं ॥३॥
तिविहं तिविहेणेअं मिच्छत्तं जेहिं वज्जिअं दूरं।
निच्छयओ ते सड्ढा अन्ने उण नामओ चेव ॥४॥

अत एव--

सेसा मिच्छदिट्ठी गिहिलिंगकुलिंगदव्वलिंगेहिं।

इत्यत्र द्रव्यलिङ्गिनोऽनन्तरोक्तलक्षणा एव ग्राह्याः। न तु सिज्जातरपिण्डादि कियद्दोषदूषितदेशपार्श्वस्थास्तेषां हि सातिचारचारित्रसद्भावेऽपि मिथ्यादृष्टित्वे प्रोच्यमाने महत्याशातना स्यात्। न च सातिचारचारित्रत्वं तेषामसिद्धं। यदुक्तं श्रीप्रवचनसारोद्धारसूत्रवृत्तौ, एतेषु पार्श्वस्थं सर्वथैवाचारित्रिणं केचिन्मन्यन्ते, तत्तु न युक्तं प्रतिभाति. यतो यद्येकान्तेन पार्श्वस्थोऽचारित्री स्यात् तदा सर्वतो देशतश्चेति विकल्पद्वयकल्पनमसङ्गतं स्यात् चारित्राभावस्योभयत्रापि तुल्यत्वात्। तस्माज्जायते पार्श्वस्थस्य सातिचारचारित्रसत्तापि। यतो निशीथचूर्णावपि

पासत्थो अच्छइ सुत्तपोरिसिं अत्थपोरिसिं वा न करेइ। दंसणाइआरेसु वट्टइ। चारित्ते न वट्टइ, अ-

इआरे वा न वज्जेइ । एवं सत्थो अच्छइ पासत्थोत्ति ”

एतावता चास्य न सर्वथा चारित्राभावोऽवसीयते । इति प्रवचनसारोद्धारवृत्तौ । अत्र च निशीथचूर्णौ—

चारित्ते न वट्टइ ।

। इति सर्वपार्श्वस्थग्रहणं ।

‘ अइआरे न वज्जइ ’

इति च देशपार्श्वस्थग्रहणं संभाव्यते । पार्श्वस्थं च केचिद्चारित्रिणं मन्यन्ते । इति वचनाद्वसन्नादीनां सुतरां चारित्रसद्भावो निर्णीयते । सर्वथा चारित्राभावे च तेषामागमोक्त कारणे जाते वंद्यत्वमपि तेषां न सङ्गच्छते । नहि क्वापि महत्यपि कारणे परतीर्थिकानां वंद्यत्वं सिद्धान्ते प्रतिपादितम् । तथा श्रीओघनिर्युक्तौ—

[1]एस गमो पंचण्हवि नीयाईणं गिलाणपडिअरणे ।
फासुअकरणनिकायणकहणपडिकामणा गमणं ॥१॥

इत्यत्र पार्श्वस्थादीनां ग्लानत्वे प्रतिजागरणं संविग्नविहारं प्रत्यभ्युत्थितत्वे सति साधुना सङ्घाटकरणं च ।

---

१ व्या० ‘एष गमः’ एष परिचरणविधिः ‘पंचण्हवि’ पञ्चानामपि, केषामत आह—‘ नियाईणं ’ आदिशब्दात् पासत्थोसण्णकुसीलसंसत्ताणं, ‘गिलाणपडिअरणे’त्ति ग्लानप्रतिचरणे एष विधिः ‘फासुअकरण’त्ति यदुत प्रासुकेन भक्तादिना प्रतिचरणं कार्यं. ‘निकायण’त्ति निकाचनं करोति, यदुत दृढीभूतेन त्वया यदहं ब्रवीमि तत्कर्त्तव्यम्. ‘कहण’त्ति धर्मकथाया, यद्वा ‘कहण’त्ति लोकस्य कथयति—किमस्य प्रव्रजितस्य शक्यतेऽशुद्धेन कर्त्तुम् ? ‘पडिकामण’त्ति यद्यसौ ग्लानः प्रतिक्रामति तस्मात्स्थानान्निवर्त्तत- इति यावत् ततः स्थानात् ‘गमण’त्ति तं ग्लानं गृहीत्वा गमनं करोति

नहि तेषां मिथ्यादृष्टित्वे सति संभवति इति । श्रीउपदेशमालायामपि—

[1]एगागी पासत्थो सच्छंदो ठाणवासि ओसन्नो ।
दुगमाईसंजोगा जह बहुश्रा तह गुरू हुंति ॥१॥

अत्र द्विकादियोगा गुरवो बहुदोषाः । पदानां वृद्ध्या दोषवृद्धेः ।

[2]गच्छगओ श्रणुओगी गुरुसेवी अनियश्रो गुणाउत्तो ।
संजोएण पयाणं संजमश्राराहगा भणिया ॥ १ ॥

अत्र गच्छगतो न एकाकी । अनुयोगी न पार्श्वस्थो गुरुसेवी न स्वच्छन्दः । अनियतवासी न नित्यवासी । आयुक्तो नाऽवसन्नः । अत्र च पदानां वृद्ध्या गुणवृद्धिः । अत्र गच्छगतत्वादिपदचतुष्कयोगेऽनुयोगित्वायुक्तत्वयोरन्यतरस्यायोगे पार्श्वस्थत्वस्यावसन्नत्वस्य वा भावेऽपि

---

१ व्याख्या—'एगागीत्ति' एकाकी धर्मबन्धवशिष्यरहितः १ पार्श्वस्थो ज्ञानादीनां पार्श्ववर्त्ती २ सच्छंदोत्ति' गुर्वाज्ञारहितः ३ स्थाने एकस्मिन्नेव स्थाने वसतीति स्थानवासी ४ 'ओसन्नो इति' प्रतिक्रमणादिक्रियाशिथिलः ५ एतेषां दोषाणां मध्ये द्व्यादिसंयोगाः, द्वौ दोषौ, त्रयो दोषाः, चत्वारो दोषाः, पञ्च दोषाः, एवं मिलिताः 'जह इति' यथा यस्मिन् पुरुषे बहवो भवन्ति 'तह इति' तथा स गुरुविराधको भवतीत्यर्थः ॥

२ व्या०—'गच्छ इति' गच्छगतो गच्छमध्ये तिष्ठति, अणुओगीत्ति' अनुयोगो ज्ञानाद्यासेवनं तत्रोद्यमवान्, गुरुसेवाकारकः, अनियतवासी मासकल्पादिना विहारकारी, आयुक्तः प्रतिक्रमणादिक्रियायां, एतेषां पञ्चपदानां संयोगेन संयमस्य चारित्रस्याराधका भणिताः, यत्रैते गुणा बहवः स विशेषेणाराधक इत्यर्थः ॥

संयमाराधकत्वं भणता, भणितमेव पार्श्वस्थादीनामपि चारित्रित्वम् । श्रीजीतकल्पभाष्ये—

तथा–पासत्थोसन्नाणं कुसील–संसत्तनीयवासीणं ।
जो कुणइ ममत्ताई परिवारनिमित्तहेउं च ॥१॥
तस्स इमं पच्छित्तं० ॥२॥

अह पुण साहम्मित्ता संजमहेउं च उज्जमिस्सति वा ।
कुलगणसंघगिलाणे तप्पिस्सति एव बुद्धी तु ॥३॥
एव ममत्तकरेंते परिवालण अह व तस्स वच्छल्लं ।
दढ आलंबणचित्तो सुज्झति सव्वत्थ साहू तु ॥४॥

इति श्रीजितकल्पस्य भाष्ये पार्श्वस्थादीनां ममत्वादि ममायं परिवारो भविष्यतीत्यादिकारणैरेव निषिद्धं । साधर्मिकत्वादिकारणैस्तु अनुमतमेव । यच्च श्रीमहानिशीथे सुमतिश्राद्धस्यानन्तसंसारित्वमुक्तं, तन्न कुशीलसंसर्गमात्रजनितं, किन्तु नागिलनाम्ना भ्रात्रा प्रतिबोधनेऽपि शुद्धचारित्रिसद्भावेऽपि तादृक् कुशीलनिद्धंधसपरिवारस्य सचित्तोदकपरिभोगादिबहुदोषदुष्टस्यैकान्तमिथ्यादृष्टेरभव्यस्य ज्येष्ठसाधोः पार्श्वे दीक्षाग्रहणेन, 'जारिसउ तुमं अबुद्धि उ तारिसो सोवि तित्थयरो' इति श्रीतीर्थकराशातनाकारित्वेन च वेदितव्यम् । किञ्च–यदि पार्श्वस्थादीनां लिङ्गधारित्वमेवेष्टं स्यात् । तदा "दगपाणं पुप्फफलमित्यादि" पूर्वोक्तोपदेशमालागाथापंचकेन लिंगमात्रधारिणां लक्षणानि ।

"बायालमेसणाओ" इत्यादिपूर्वोक्तगाथासमुदायेन च पार्श्वस्थादिस्थानादि कुतः पृथक् पृथक् प्रतिपादितानि ततोऽयमाशयः।

दगपाणं पुप्फफलं अणेसणिज्जं गिहत्थकिच्चाइं ।
अजया पडिसेवंती जइवेसविडंबगा नवरं ॥१॥"

इत्यादि लक्षणभूतो द्रव्यलिङ्गिनोऽसंयता एव । "बायालमेसणाओ न रक्खइ" इत्यादि पार्श्वस्थादिस्थानानि तु पुनः पुनः सेवमानः पश्चात्तापमुक्तो गुरोः पुरस्तदनालोचयन् शनैः शनैः कियता कालेनासंयतो भवति । न चायमर्थः स्वमनीषिकयोच्यते यदुक्तं श्रीकल्पेऽपि तृतीयखण्डे—

एसणदोसे सीअइ अणाणुतावी न चेव विअडेइ ।
नेव य करेइ सोधिं न य विरमइ कालओ भस्से॥१॥

अत्र वृत्तिः एषणादोषेषु सीदति । तद्दोषदुष्टं भक्तपानं गृण्हातीत्यर्थः, पुरः कर्मादिदोषदुष्टाहारग्रहणेऽपि न पश्चात्तापवान् । न चाशुद्धाहारग्रहणाद्विरमति । न विकटयति गुरूणां पुरतः स्वदोषं प्रकाशयति । विकटयति वा गुरुदत्तं प्रायश्चित्तं न करोति । एवं कुर्वन् कियतामपि कालेन चारित्रात् परिभ्रश्येदिति । ततो आवश्यके—

[१]गुणाहिए वंदणयं छउमत्थो गुणागुणे अयाणंतो ।
वंदिज्जा गुणहीणं गुणाहियं वावि वंदावे ॥१॥

---

व्या० इहोत्सर्गतः गुणाधिके साधौ वन्दनं कर्तव्यमिति वाक्यशेषः, अयं चार्थः श्रमणं वन्देतेत्यादिग्रन्थात्सिद्धः, गुणहीने तु प्रतिषेधः पश्चानां कृतिकर्मेत्यादिग्रन्थाद् , इदश्च गुणाधिकत्वं गुणहीनत्वं च तत्त्वतो दुर्विज्ञेयम्, अतश्छद्मस्थस्तत्त्वतो गुणागुणान् आत्मान्तरवर्तिनः ' अजानन् ' अनवगच्छन् किं कुर्यात् ? वन्देत वा गुणहीनं कश्चित्, गुणाधिकं चापि वन्दापयेत् ॥

इत्यावश्यकवचनप्रामाण्यात् कालोचितयतनया यतमाना यतयो गुणाधिकत्वात् श्राद्धानां वन्द्या एव । ननु न वयं सर्वथा साधूनामभावं वदामः । किन्तु मा पार्श्वस्थादयोऽभूवन् मा तद्वन्दनदोषश्चाभूत्, इति न वन्दामहे । तर्हि जातं युष्माकमप्याषाढाचार्यशिष्यवदव्यक्तनिह्नवत्वं । यथा च पार्श्वस्थादिवन्दनदोषात् भीयते । तथा—

**माणे १ अविणय २ खिंसा ३ नीअगोअं ४ अबोहि ५ भववुड्ढी ६ अनमंते छद्दोसा ॥**

इति साध्ववन्दनजनिताबोध्यादिदोषेभ्यः कस्मान्न भीयते, ततो मोक्षार्थिन् ! सकलसङ्घप्रमाणीकृतं मार्गमवगणय्य साम्प्रतमेवास्मदादिदृष्टचरेणाग्राह्यनामधेयेन केनापि पुरुषापशब्देन साधूनामुपरि जातमत्सरेण निजकुमतिपरिकल्पितेषु च वचनेषु मा कर्णं देहि । यतः— श्रीउपदेशमालायां,

**निअगमइ विगप्पिअ चिंतिएण सच्छंदबुद्धिरइएण । कत्तो पारत्तहिअं कीरइ गुरुअणुवएसेणं ॥१॥**

इति ॥ तथा बृहद्भाष्ये—

---

१ व्याख्या—'नियगमइ इति' निजकमत्या स्वकीयबुद्ध्या विकल्पितं स्थूलावलोकनं सूक्ष्मावलोकनं, तेन स्वकीयमतिकल्पनयेत्यर्थः, स्वच्छंदबुद्धिरचितेन स्वतन्त्रमतिचेष्टितेनेत्यर्थः । 'कत्तो' इति कुतः 'पारत्त' परत्र परे लोके हितमात्मनो हितं 'कीरइ' इति क्रियते ? गुरुर्वनुपदेशात उपदेशाऽयोग्येन गुरुकर्मणेति भावः, स्वेच्छाचारिणः परत्र हितं न प्राप्नुवन्तीत्यर्थः

संसिज्जइ निअकिरिआ दूसिज्जइ सयलसंघववहारो
कत्तो इत्तो वि पराविमाणणा हंदि संघस्स ॥१॥
उप्पन्नसंसया जे सम्मं पुछंति नेव गीअत्थे ।
चुक्कंति सुद्धमग्गा ते पल्लवगाहि पंडिच्चा ॥२॥
जो मोहकलुसिअ-मणो, कुणइ अदोसे त्ति दोससंकप्पं
सो अप्पाणं वंचइ पेआवमगोवणिसुउव्व ॥ ३ ॥
अवसउणकप्पणाए सुंदरसउणो (वि) असुंदरं फलइ ।
इअ सुंदरावि किरिआ असुहफला मलिणहिअयस्स ॥

इति । न च शासने केषांचिद्दोषान् दृष्ट्वा सर्वेषां सदोषत्वमारोपयितुं युक्तं, यतो बृहद्भाष्ये—

जो जिणसंघं हीलइ संघावइवस्स दुक्कयं दट्ठुं ।
सव्वजणहीलणिज्जो भवे भवे होइ सो जीवो ॥ १ ॥
जइ कम्मवसा केई असुहं सेवंति किमिह संघस्स ।
विट्टालिज्जइ गंगा कयाइ किं कागसबरेहिं ॥२॥
जो पुण संताऽसंते दोसे गोवेइ समणसंघस्स ।
विमलजसकित्तिकलिओ सो पावइ निव्वुइं तुरिअं ॥३॥
जह कणरक्खणहेउं रक्खिज्जइ जत्तओ पलालंपि ।
सासणमालिन्नभया । तहा कुसीलंपि गोविज्जा ॥ ८ ॥

इति । तथा—ननु पार्श्वस्थादीनां वंद्यत्वे, कथं पासत्थो ओसन्नो इत्यादिवाक्यैः सह न विरोधः, उच्यते—

सर्वदेशपार्श्वस्थादीनामुक्तयुक्त्या वन्द्यत्वमवन्द्यत्वं चाऽस्ति । आगमवाक्यानि च नयवाक्यप्रमाणवाक्यत्वेन द्विधाऽपि भवति । यतः श्रीउपदेशमालायां—

नाणाहिओ वरतरं हीणो वि हु पवयणं पभावंतो ।
नयदुक्करं करिंतो सुट्ठु वि अप्पागमो पुरिसो ॥१॥

श्री आवश्यके—

नाणं मुणेह नाणं गुणेह नाणेण कुणउ किच्चाइं ।
भवसंसारसमुद्दं नाणी नाणेण उत्तरइ ॥ १ ॥

तथा भक्तपरिज्ञा प्रकीर्णके—

दंसणभट्ठो भट्ठो न हु भट्ठो होइ चरणपब्भट्ठो ।
सिज्झंति चरणरहिआ दंसणरहिआ न सिज्झंति ॥१॥

तथा श्रीआवश्यके—

दसारसीहस्स य सेणिअस्स पेढालपुत्तस्स य सच्चइस्स अणुत्तरा दंसणसंपया तया विणा चरित्तेणऽहरं गइं गया

तथा श्री आवश्यके—

---

१ व्याख्या--'नाणाहिओ इति' ज्ञानेनाधिकः पूर्णो ज्ञानाधिको वरतरं श्रेष्ठः, हीनोऽपि चारित्रक्रियाहीनोऽपि हु निश्चितं प्रवचनं जिनशासनं प्रभावयन्, एतादृशः क्रियाहीनोऽपि ज्ञानी श्रेष्ठ इत्यर्थः, 'न य इति' न च श्रेष्ठो दुष्करं मासक्षपणादि कुर्वन् सम्यक्प्रकारेण 'अप्पागमोत्ति' अल्पश्रुतः पुरुषः क्रियावानपि ज्ञानहीनो न श्रेष्ठ इत्यर्थः ॥

इय नाणचरणरहिओ सम्मद्दिट्ठी वि मुक्खदेसं तु ।
पाउणइ नेव नाणाइसंजुओ चेव पाउणइ ॥ १ ॥

तथा श्रीउत्तराध्ययने—

नाणं च दंसणं चेव चरित्तं च तवो तहा ।
एस मग्गुत्ति पण्णत्तो जिणेहिं वरदंसिहिं ॥ १ ॥

श्री आवश्यके—

नाणं पयासगं सोहओ तवो संजमो अ गुत्तिकरो ।
तिण्हं पि समाओगे मुक्खो जिणसासणे भणिओ ॥ २ ॥

इत्यादिषु क्वचित्केवलस्य ज्ञानस्य क्वचिद्दर्शनस्य क्वचिच्चारित्रस्य क्वचित्तत्त्रयस्य क्वचिज्ज्ञानदर्शनचारित्रतपसां च मोक्षसाधनत्वं प्रतिपाद्यते । न चात्र कश्चिद्विरोधः, न चापि मतिमतामत्र मतिमोहः कर्त्तुं युक्तः । आगमे हि कानिचित् एकैकांशग्राहकतया नयवाक्यानि भवन्ति, कानिचिच्च संपूर्णार्थग्राहकतया प्रमाणवाक्यानि, अत एवातिनिपुणमतीनामेव भगवदाज्ञा अवगन्तुं शक्या । यदावश्यके—

झाइज्जा निरवज्जं जिणाण आणं जगप्पईवाणं ।
अनिउणजणदुन्नेयं नयभंगपमाणगमगहणं ॥ १ ॥
तथा— पुव्वावरेण परिभाविऊण सुत्तं पयासिअव्वंति
जं वयणपारतंतं एअं धम्मत्थिणो लिङ्गं ॥ १ ॥

ततश्च पार्श्वस्थादीनां क्वचिदवन्द्यत्वमेव प्रतिपाद्यते ।

क्वचिच्चावश्यकजीतकल्पादौ कारणे साधून् श्राद्धांश्चा-श्रित्य वंद्यत्वम् । जीवानुशासनग्रन्थादौ तु--

किं च जइसावयाणं नमणं नो सम्मयं भवे एअं ।
पासत्थाईआणं ता कह उवएसमालाए ॥ १ ॥
सिरिधम्मदासगणिणा न वारिअं वारिअं च अन्नेसिं ।
परतित्थिआणपणमणइच्चाईवयणओ पयडं ॥ २ ॥
संघेण पुणो बाहिं जो विहिओ हुज्ज सो उ नो वंदे ।
पासत्थाई सड्ढाण सव्वहा एस परमत्थो ॥ ३ ॥

इत्यादि युक्त्या श्राद्धानाश्रित्य निष्कारणेऽपि वन्द्यत्वम् । क्वचिच्चासंयतत्वं क्वचिच्च चारित्रित्वं प्रतिपाद्यते, तदेषां सर्वेषां वाक्यानामयं भावो बहुश्रुतैरभिधीयते । सर्वपार्श्वस्थसर्वावसन्नयथाच्छन्दा बहुदोषत्वेनावन्द्या भवन्तु । देशपार्श्वस्थादयस्तु तादृगपरशुद्धचारित्र्यभावे प्रागुक्तयुक्तिभिश्चारित्रसत्तायाः प्रतिपादितत्वेन बकुशकुशीलादिलक्षणान्तःपातित्वेन च प्रागुक्तज्ञानग्रहणादिकारणैश्च वन्द्या एव । उक्तमपि-

पलए महागुणाणं हवंति सेवारिहा लहु गुणा वि ।
अत्थमिए दिणनाहे अहिलसइ जणो पईवंपि ॥१॥
गुणगणरहिओ अगुरू दट्ठव्वो मूलगुणविउत्तो जो ।
नयगुणमित्तविहीणित्थं चंडरुद्दो उदाहरणं ॥ २ ॥

तथा ३५५ गाथामाने श्राद्धप्रतिक्रमणसूत्रभाष्येऽप्युक्तं -किञ्च--

सम्मग्गगुणजुअं पत्तं पाविज्जए न दुसमाए ।
ईअरम्मि वि तो भत्ती कायव्वा तम्मि भणिअं च १
पलए महागुणाणं० ॥ २ ॥
भूरिगुणो विरलोच्चिअ इक्कगुणो वि हु जणो न सव्वत्थ
निद्दोसाण वि भद्दं पसंसिमो थेव दोसे वि ॥ ३ ॥
दंसणनाणचरित्तं तव० ॥ ४ ॥

इति । श्रीमहानिशीथेऽपि पूर्वगुरुयोग्यगुणौघमुक्त श्री वीराद्वर्षद्विसहस्रयनन्तरं षट्कायारम्भवर्ज्यैव गुरुर्वन्द्यतयोक्तः तदत्र रहस्यं यथा ।

"वंतुच्चारसुरागोमंससममिमंति" इत्यादिनाऽऽधाकर्मणो अतिनिन्द्यत्वप्रतिपादनेऽपि—

सोहंतो अइमेतह जइज्ज सव्वत्थपणगहाणीए ।
उस्सग्गववायविउ जह चरणगुणा न हायंति ॥ १ ॥

इत्यादिवचनात्पञ्चकपञ्चकपरिहान्यादियतनया देहयात्रार्थमाधाकर्म गृण्हानोऽपि शुद्ध एव । एवं "असुइठाणे पडिआ चंपगमाला न कीरइ सीसे" इत्यादि वाक्यैः पार्श्वस्थादीनां संगतिमात्रनिषेधेऽपि विशिष्टविशिष्टतरविशिष्टतमगुणसाध्वयोगे क्रमेण तेभ्यो हीनहीनतरहीनतमगुणानामपि साधूनां वन्दनादि सङ्गतमेव । यद्वा साम्प्रतकालोचितयतनया यतमाना यतयः प्रमादादिपारवश्येन किञ्चित् किञ्चित् विराधयन्तोऽपि मोक्षार्थमुद्यताः प्रागुक्तलक्षणबकुशकुशीलत्वं न व्यभिचरन्तीति तीर्थाधारत्वेन निर्ग्रन्थत्वेन च निर्विवादं वंदनीया एव । यतः—

अज्जवि तिन्नपइन्ना गरुअभरुव्वहणपच्चला लोए ।
दीसंति महापुरिसा अक्खंडिअ सीलपब्भारा ॥ १ ॥
अज्जवि तवसुसिअंगा तणुअकसाया जिइंदिआ धीरा ।
दीसंति जए जइणो वम्महहिअयं विआरंता ॥ २ ॥
अज्जवि वयसंपन्ना छज्जीवनिकायसंजमुज्जुत्ता ।
दीसंति तवस्सिगणा विगहविरत्ता य महासत्ता ॥३॥
अज्जवि दयखंतिपइट्ठिआइं तव नियमसीलकलिआइं
विरलाइं दूसमाए दीसंति सुसाहुरयणाइं ॥४॥
इयजाणिऊण एअं मा दोसं दूसमाइ दाऊणं ।
धम्मुज्जमं पमुच्चह अज्जवि धम्मो जए जयइ ॥५॥
ता तुलिअनिअबलेणं सत्तीइ जहागमं जयंताणं ।
संपुन्नच्चिअकिरिआ दुप्पसहं ताण साहूणं ॥६॥

न च प्रायः प्रतिगच्छं सामाचारीणां भेददर्शनान्न ज्ञायते का सत्या असत्या वेति ? तदकरणमेव वरमिति चिंतयितुं युक्तं । यदुक्तं श्रीभगवत्यां प्रथमशते द्वितीयोद्देशके—

अत्थिणं भंते ! समणा वि निग्गंथा, कंखामोहणीयं कम्मं वेअंति । हंता अत्थि । कहन्नं भंते ! समणा निग्गंथा कंखामोहणिज्जं कम्मं वेअंति । गोयमा ! तेहिं २ नाणंतरेहिं दरिसणंतरेहिं । चरित्तंतरेहिं लिंगतरेहिं पवयणंतरेहिं पावयणंतरेहिं क-

प्पंतरेहिं मग्गंतरेहिं मयंतरेहिं भंगंतरेहिं नयंतरेहिं निअमंतरेहिं पमाणंतरेहिं संकिआ कंखिआ वितिगिच्छिआ भेअसमावन्ना एवं खलु समणा निग्गंथा कंखामोहणिज्जं कम्मं वेअंति ।

अत्र वृत्ता मग्गंतरेहिं मयंतरेहिं इति पदद्वयव्याख्या यथा-मार्गः पूर्वपुरुषक्रमागता सामाचारी तत्र केषांचित् द्विश्चैत्यवन्दना अनेकविधकायोत्सर्गकरणादिका आवश्यकसामाचारी तदन्येषां तु न तथेति किमत्र तत्त्वं। समाधिः गीतार्थाऽशठप्रवर्त्तिता असौ सर्वापि न विरुद्धा. आचरितलक्षणोपेतत्वात्, आचरितलक्षणं चेदम्—

असढेण समाइण्णं जं कत्थइ केणइ असावज्जं ।
न निवारिअमन्नेहिं बहुमणुमयमेअमायरिअं ॥१॥

तथा मतं समाने एवागमे आचार्याणामभिप्रायविशेषः। तत्र सिद्धसेनदिवाकरो मन्यते युगपत्केवलिनो ज्ञानं दर्शनं, चान्यथा तदावरणक्षयनिरर्थकता स्यात्। जिनभद्रगणिक्षमाश्रमणस्तुभिन्नसमये ज्ञानदर्शने. जीवस्वरूपत्वाद्यथा तदावरणक्षयोपशमे समानेऽपि क्रमेणैवमतिश्रुतोपयोगौ, न चैकतरोपयोगे इतरक्षयोपशमाभावः । तत्क्षयोपमस्योत्कृष्टतः षट्षष्टिसागरोपमप्रमाणत्वात् । अतः किं तत्त्वं । अत्र समाधिः यदेवमतमागमानुपाति, तदेव सत्यमिति मन्तव्यमितरत्पुनरुपेक्षणीयम् । यथा बहुश्रुतेन नैतदवसातुं शक्यते, तदेवं भावनीयम्, आचार्याणां संप्रदायादिदोषादयं भेदो मतः । जिनानां तु मत-

मेकमेवाविरुद्धं च, रागादिरहितत्वात् । आह च—

अणुवकयपराणुग्गह--परायणा जं जिणा जुगप्पवरा ।
जिअरागदोसमोहा य नण्णहा वाइणो तेण ॥१॥

इति । तस्माद् व्यवहारतो यतमाना यतयो धर्मार्थिना वन्द्या एव यतः श्रीउत्तराध्ययने—

धम्मज्जिअं च ववहारं बुद्धेहायरिअं सया ।
तमायरंतो ववहारं गरिहं नाभिगच्छइ ॥१॥

श्री आवश्यके—

ववहारो वि हु बलवं जं छउमत्थंपि वंदई अरिहा ।
जो होइ अणाभिन्नो जाणंतो धम्मयं एअं ॥१॥

जइ जिणमयं पवज्जह ता मा ववहारनिच्छए मुअहा ।
ववहार नउच्छेए तित्थुच्छेओ हवइ जम्हा ॥२॥

व्यवहारनयमनुसरत एव हि क्रमेण निश्चयशुद्धिप्राप्त्या निःश्रेयसप्राप्तिर्भवति । अत्र साधुस्थापनाधिकारः संवेगरङ्गशालाग्रन्थतस्तद्गाथाभिरेव लिख्यते यथा ।

इत्थंतरम्मि सड्ढो आसधरो नाम भणइ दुविअड्ढो अ
भयवं जहुत्तसाहू न संति गुरुणो कहं ते य ॥१॥

पिंडविसुद्धिं न तहा कुणंति१ सक्कंपि नायरंति विहिं २
पासत्थाईहिं समं चयंति नालंबणनमणाइं३ ॥२॥

न परूवंति य सुद्धं४ न धरंति पमाणजुत्तमुवगरणं५ ।
थेवेसु वि रोगेसु जह तह सेवंति अववायं ६ । ॥३॥
इअ अट्ठारससीलंग--सहस्सधरणं विणा कहं समणा ।
हुंति गुरू तदभावे कह वा ते वंदणिज्जा य ॥४॥
भणिअं गुरुणा भद्दय ! मा साहूणं अभावमुल्लवसु ।
तदभावे धम्मस्सवि नूणमभावो तए इट्ठो ? ॥५॥
मिच्छत्तपउरयाए न नज्जई दाणिं देवनामंपि ।
किं पुण कालोचिअ सुमुणिविरहओ मग्गविन्नाणं ६॥
पिंडविसुद्धिं न कुणंति जं च वुत्तं तयपि हु न जुत्तं ।
निअसत्तिकालक्खित्ताणुसारओ तप्पवित्तीए ॥७॥
गिद्धिसढभावविरहा सुद्धी तदभावओ त्ति जं भणिअं।
सुद्धं गवेसमाणो आहाकम्मे त्ति सो सुद्धो ॥८॥
कह नज्जइ अगिद्धी घरधणसयणाइं सव्वचागाओ ।
तं जेसि नासिपुव्विं ते कह नणु इत्थ चागीओ ॥९॥
सुकरो इच्छाचागो अभावओ वि अ तुमं न किं कुणसि
दोणुद्धरणाइ खमा तुज्झ विनोदी सएलच्छो ॥१०॥
नेवायरंति सक्कंपि जं च भणिअं तयंपि निस्सारं ।
आवस्सयाइं किं ते न कुणंति जमेवमुल्लवसि ॥११॥
अहविगइचागमणु--खणमुस्सग्गं कप्पविहरणाईअं ।
सक्कंपि नायरंती कह नज्जइ सक्कमेअमहो ॥१२॥

सामत्थकालदोसा सक्कंपि कयाइ जायइ असक्कं ।
आयव्वयतुलणाए तदकरणे वि हु न तो दोसो॥१३॥
पासत्थाईसंगो नमणं च न संगयंति जं वयसि ।
तं पिहु मिच्छासिद्धंत-वयणओ तप्पवित्तीए ॥१४॥
नणु सिद्धंतनिसिद्धं आलवणाई वि किं पुणो नमणं ।
ओसन्नो पासत्थो इच्चाई भूरि भणणाओ ॥१५॥
सव्वमिमं ता सुत्ते वायनमोक्कारमाइ किं वुत्तं ।
परिआयपरिसपुरिसा द[दे]विक्खओ अ हतयं मूढा॥१६
जइ ते फुडं अजोगा ता--तन्नमणाइकीसाणुन्नायं ।
कारणमवि हु इहरा पासंडीणं पि तं होउ ॥१७॥
अह ते नो जिणलिंगे का तदविक्खा हु भावसारत्ते ।
अणुअत्तणा य भणिआ तेसिं पि हु जेण वुत्तमिमं॥१८॥
अग्गीयादाइन्ने खित्ते अन्नत्थ ठिइअभावम्मि ।
भावाणुवघायणुवत्त--णाए तेसिं तु वसिअव्वं ॥ १९ ॥
इहरा सपरुवघाओ उच्छोभाईहिं अत्तणो लहुआ ।
तेसिं च कम्मबंधो दुगंपि एअं अणिट्ठफलं ॥ २० ॥
ता दव्वओ उ तेसिं अरत्तदुट्ठेण कज्जमासज्ज ।
अणुवत्तणत्थमेसिं कायव्वं किंपि उ ण भावाओ॥२१॥
न परुवंति य सुद्धं एअं पि य दूसणं जहाजोगं ।
पन्नवणं चिअ वुत्तं इहरा दोसो त्ति जं भणिअं ॥ २२ ॥

आमे घडे निहित्तं जहा जलं तं घडं विणासेइ ।
इय सिद्धंतरहस्सं अप्पहारं विणासेइ ॥ २३ ॥
जोग्गाजोग्गमबुज्झिय धम्मरहस्सं कहेइ जो मूढो ।
संघस्स य पवयणस्स य धम्मस्स य पच्चणीओ सो॥२४
न पमाणजुत्तमुवहिं धरंति एअं पि तुच्छमाभाइ ।
असढोवदंसिअत्तेण तव्विहस्सुवहिनिवहस्स ॥ २५ ॥
इहरा बाहुठिअं पत्तं एअं तु पडलयच्छन्नं ।
पच्चा बंधकयं पुण बीअं मत्तं अगोअर उ ॥२६॥
एगंगि अ रयहरणं भवे न इण्हिं विसिट्ठमुणिणो वि ।
तो एत्थपयत्थम्मि य पुव्वमुणिणो च्चिअ पमाणं॥२७॥
सेवंति य अववायं दूसणमेअंपि घडइ नो सम्मं ।
तव्विहसंघयणाई विरहा सुत्तुत्ति उ तह य ॥ २८ ॥
सव्वत्थ संजमं संजमाओ अप्पाणमेव रक्खिज्जा ।
मुच्चइ अइवायाओ पुणो विसोही नयाविरई ॥२९॥
किअ-काहं अच्छित्तं अदुवाअहीअं तवोवहाणंमि
अउज्जमिस्सं ।
गणंव नीईइव सारइस्सं, सालंबसेवी समुवेइ मोक्खं३०
सीलंगाण विभावो नाउं सव्वन्नुवयणओ चेव ।
कह भणिअमन्नहेमं बकुसकुसीलेहिं जा तित्थं ॥३१॥
कालानुसारिकिरियारयत्ति चारित्तिणो पवुच्चंति ।

जह कप्परुक्खविरहे रुक्खा भन्नंति निंबा वि ॥३२॥
अह सम्म मा मुणियंमि मुणिम्मि नमणाइ कीरइ कहं ति
वभिचार दंसणाओ एअंपि न सुंदरं जम्हा ॥३३॥
छउमत्थसमयवज्जा ववहारनयाणुसारिणी सव्वा ।
तं ववहारं कुव्वं सुज्झइ सव्वो वि समईए ॥३४॥
जइ जिणमयं पवज्जह ता मा ववहार निच्छए मुअह
ववहारनउच्छेए तित्थुच्छेओ हवइ जम्हा ॥३५॥तथा--
धम्मज्जिअं च ववहारं बुद्धेहायरियं सया ।
तमायरंतो ववहारं गरिहं नाभिगच्छइ ॥ ३६ ॥
ता दूसमाए दोसं--विउं जत्थ जं पलोएज्जा ।
नाणे व दंसणे वा चरणे वा तमुववूहेज्जा ॥ ३७ ॥
किञ्च—

न विणा तित्थं निअंट्ठेहिं नातित्था य निअंठिआ ।
छक्कायसंजमो जाव ताव अणुसज्जणा दुण्हं ॥३८॥
तहा—जा संजमया जीवेसु ताव मूला य उत्तरगुणा य
इत्तरिअछेअसंजम--निग्गंथबउसा य पडिसेवी ॥३९॥
वीरपुरिसपरिहाणिं नाऊणं मंदधम्मिआ केइ ।
संविग्गजणं हीलंति ताण पयडा इमे दोसा ॥४०॥
संतगुणछायणा खलु परपरिवाओ अ होइ अलिअं च
धम्मे य अबहुमाणो साहुपउसे य संसारो ॥४१॥

जइ संपुन्नं एअं हविज्ज सिद्धो विना न वुच्छिज्जा
एअंपि नो मुणिज्जइ अहो महामोहमाहप्पं ॥४२॥
देवगुरुधम्मकिरिअं पुव्वं जुत्तो विआणिउं ते वि।
हीलिज्जंती जइणो हीही अकयनु(न्नु)ओ लोगो४३
इय नरवर! किविर-मबुहजीवदुविलसिअं निसामिहिसि
साहूहिं तो वि अपरो मोक्खोवाओ धुवं नत्थि॥४४॥
आगमतत्तं च नरिंद! मुणेसु गयरागदोसमोहाणं।
एगंतपरहिआणं जिणाण वयणं हिअं अमिअं ॥४५॥
दिट्ठंतजुत्तिहेऊ गंभीरमणेगभंगनयनिउणं।
आईमज्झवसाणे सुदूरपरिचत्तवभिचारं ॥४६॥
सिवपहरयणपईवं च कुमयपवणप्पणोल्लणासज्झं।
सज्झंव बहुविहाई सयतारताराानिवहजणणं॥ ४७ ॥
इय देवम्मि गुरुम्मि अ आगमविसए य जायबोहस्स
संकाइदोसरहिआ पडिवत्ती होइ सम्मत्तं ॥४८॥
एयम्मि पावियम्मि नत्थि तयं जं न पावियं होइ।
एयं मूलाउच्चिअमहल्लकल्लाणवल्लीओ ॥ ४९ ॥
अह नयणदत्तनरवइ--सुएहिं संजायपरमतोसेहिं।
भणियं भयवं! साहुप्प--सायओ पत्तरिद्धीणं ॥५०॥
अम्हाणं पि हु पुरओ को एसो साहु दूसणं कुणइ।
अहवा होअव्वं एत्थ पुव्वदुच्चरिअदोसेणं ॥ ५१ ॥

ता भयवं ! साहह को पुण एस पुव्वे भवम्मि हुंतोत्ति ।
मुणिवइणा जंपिअमेगमणसा भो ! निसामेह ॥५२॥
एसो सावत्थीए नयरीए गिहीवइस्स बंभस्स ।
पुत्तो नाम कुबेरोत्ति आसि पिउणो य सो दोसो ॥५३॥
संभूयगणिसमीवे पव्वइओ किच्चिराणि वि दिणाणि ।
विणयनएहिं वड्ढिअ पच्छापरिवडिअ उच्छाहो ॥५४॥
आवस्सयाइएसुं आलस्सं पइदिणंपि कुणमाणो ।
गुरुणा सासिज्जंतो साहूहियकोवमुवहइ ॥ ५५ ॥
एसिंपि साहुखलिअं पिक्खित्ता भणइ निययदुच्चरिअं
रक्खंति न थेवंपि हु परस्स पुण दिंति उवएसं ॥५६॥
बालगिलाणाईणं वेआवच्चं सया वि किच्चंति ।
गुरुणो वि परेसिं पन्नवंति न सयं पुण करंति ॥५७॥
एमाइ दूसणाइं वागरमाणो किलिट्ठमणवयणो ।
मरिउं असुरनिकाए किब्बिसिआसुं सुरिं पत्तो ॥५८॥
तत्तो चविऊं इण्हिं सावयभावं गओ वि एस इहं ।
पुव्वाणुवेह उच्चिअ पडुच्च मुणिणो इअ भणेइ ॥५९॥

इति । यदुक्तं कल्पभाष्ये—

उस्सुत्तभासगा जे ते दुक्करकारगावि सच्छंदा ।
ताणं न दंसणं पि हु कप्पइ कप्पे जओ भणिअं ॥१॥

जे जिणवयणुत्तिन्नं वयणं भासंति जे अ मन्नंति ।
सम्मद्दिट्ठीणं तद्दंसणं पि संसारवुड्ढिकरं ॥ २ ॥

इति साम्प्रतसमयोचितयतनया यतमानाः साधवः वंदनीया एव—

इति श्री सुविहितपूर्वाचार्य प्रणीता—

# ॥ गुरुतत्त्वसिद्धिः ॥

समाप्ता।

# ॥ प्रतिमागुणदोषविचारः ॥

## ॥ बिम्बपरीक्षाप्रकरणम् ॥

अतीताब्दशतं यत्स्याद् यच्च स्थापितमुत्तमैः ।
तद् व्यङ्गमपि पूज्यं स्याद् बिम्बं तन्निष्कलङ्कवत् ॥१॥
धातुलेप्यादिकं बिम्बं व्यङ्गं संस्कारमर्हति ।
काष्ठपाषाणनिष्पन्नं संस्कारार्हं पुनर्नहि ॥ २ ॥
गुलीऽंगुलीबाहुनासांऽह्णीणां भङ्गेऽप्यनुक्रमात् ।
शत्रुभीर्देशभङ्गश्च बन्धः कुलधनक्षयः ॥ ३ ॥
पीठयानपरीवार--ध्वंसे सति यथाक्रमम् ।
जनवाहनभृत्यानां नाशो भवति निश्चितम् ॥ ४ ॥
आरभ्यैकाङ्गुलाद् बिम्बं यावदेकादशाङ्गुलम् ।
गृहेषु पूजयेद् बिम्बं मूर्द्धपादजं ( ? ) पुनः ॥ ५ ॥
प्रतिमाकाष्ठलेप्याश्म--दन्तचित्रायसां गृहे ।
मानाधिकपीरवार-- रहिता नैव पूज्यते ॥ ६ ॥
रौद्री निहन्ति कर्त्तारं अधिकाङ्गा तु शिल्पिनम् ।
नासा द्रव्यविनाशाय स्वल्पाऽऽस्या भोगवर्जिता ॥७॥
वक्रनासाऽतिदुःखाय ह्रस्वाङ्गा क्षयकारिणी ।
अनेत्रा नेत्रनाशाय दुर्भिक्षाय कृशोदरी ॥ ८ ॥

---

१ 'हस्ताङ्गुलि' इति पदं युज्यते ?

जायते प्रतिमा हीन--कटिराचार्यघातिनो ।
जङ्घाहीना भवेद् भ्रातृ--पुत्रमित्रविनाशिनो ॥ ९ ॥
पाणिपादविहीना तु धनक्षयविनाशिनो ।
चिरं पर्युषिता वा तु नार्थतो व्यायतस्ततः ॥ १० ॥
अर्थहृत् प्रतिमोत्ताना चिन्ताहेतुरधोमुखो ।
आधिप्रदा तिरश्चीना नीचोच्चस्था विदेशदा ॥११॥
अन्यायद्रव्यनिष्पन्ना परवास्तुदलोद्भवा ।
हीनाऽधिकाङ्गी प्रतिमा स्वपरोन्नतिनाशिनी ॥ १२ ॥
सर्वेषामपि धातूनां रत्नस्फटिकयोरपि ।
प्रवालस्य च बिम्बेषु चैत्यमानं यदृच्छया ॥ १३ ॥
ऊर्ध्वदृग्द्रव्यनाशाय तिर्यग् भोगस्य हानये ।
दुःखदा स्तब्धदृक् चाधोमुखो कुलविनाशिनी॥ १४ ॥
प्रतिमायां दवरका भवेयुश्चेत्कथञ्चन ।
सदृग्वर्णा न दुष्यन्ति वर्णास्त्वन्ये तु दूषिताः ॥१५॥

॥ इति बिम्बपरीक्षाप्रकरणम् ॥

॥ बिम्बपूजापरीक्षाप्रकरणम् ॥

पित्तलसुवन्नरुप्प--रयणाणं चंदकंतमाइणं ।
कुज्जाओ लक्खणजुआ सत्तंगुलजाव नो अहिआ ॥१॥

गिहिपडिमाणं पुरओ बलिवित्थारो न चेव कायव्वो ।
निच्चनवणं तिअसज्झ--मच्चणं भावओ कुज्जा ॥ २ ॥

लेवोवलदंतयकट्ठलोह--वत्थूणं पंचपडिमाओ ।
नो कुज्जा गिहपडिमा कुलधणनासाइआ जम्हा ॥ ३॥

वेउव्वियसासयं मंगलाओ आगासचित्तलिहिआओ ।
वंदंति सेसाओ जिणपडिमाओ जणकयाओ ॥ ४ ॥

दालिद्दं दोहग्गं कुज्जाइ कुसरीर कुगइ कुमइओ ।
अवमाण रोगसोगा न हुंती जिणबिंबकारीणं ॥ ५ ॥

समयवलिसुत्ताओ लेवोवलकट्ठदंतलोहाणं ।
परिवारमाणरहिअं घरम्मि नो पूअए बिंबं॥ ६ ॥

एकाङ्गुलं भवेत् श्रेष्ठं द्व्यङ्गुलं धननाशनम् ।
त्र्यङ्गुलेन भवेत्सिद्धिर्वर्जयेच्चतुरङ्गुलम् ॥ ७ ॥

पञ्चाङ्गुलं भवेद्वित्तं उद्वेगं तु षडङ्गुले ।
सप्ताङ्गुले तु गोवृद्धिस्त्यजेदष्टाङ्गुलं सदा ॥ ८ ॥

नवाङ्गुलं तु पुत्राय अर्थहानिर्दशाङ्गुले ।
एकादशाङ्गुलं बिम्बं सर्वकामार्थसिद्धिदम् ॥ ९ ॥

नृपभयमत्यङ्गायां हीनाङ्गायामकल्पिता भर्त्तुः ।
कृशोदरायां क्षुद्भयमर्थविनाशः कृशाङ्गायां ॥ १० ॥

आयुः श्रीफलजयदा दारुमयी मृन्मयी तथा प्रतिमा
लोकहिताय मणिमयी सौवर्णी पुष्टिदा भवति ॥११॥
रजतमयी कीर्त्तिकरी प्रजावृद्धिं करोति ताम्रमयो।
भूलाभं तु महान्तं शैलप्रतिमाऽथवा लिङ्गम् ॥ ११ ॥
प्रासादतुर्यभागस्य समाना प्रतिमा मता ।
उत्तमायुः कृते सा तु कार्यैकेनाधिकाङ्गुला ॥ १३ ॥
अथवा स्वदशांशेन हीनस्याप्यधिकस्य च ।
कार्या प्रासादपादस्य शिल्पिभिः प्रतिमा मता?॥१४॥
सर्वेषामपि धातूनां  रत्नस्फटिकयोरपि ।
प्रवालस्य च बिम्बेषु चैत्यमानं यदृच्छया ॥ १५ ॥
प्रासादगर्भगेहार्धे भित्तितः पञ्चधा कृते ।
यक्षाद्याः प्रथमे भागे देव्यः सर्वा द्वितीयके ॥ १६ ॥
विनायक स्कन्ध कृष्णानां प्रतिमाः स्युस्तृतीयके।
पद्मा तु तुर्यभागे च लिङ्गमीशां न पञ्चमे ? ॥१७॥

........................................................

भागे तृतीयेऽर्हद्‌बिम्बं स्यात् द्वितीयेऽम्बिकादयः ॥१८॥
आसने वाहने चैव परिवारे तथा युधे ।
नखाभरणवस्त्रेषु व्यङ्गदोषो न जायते ॥ १९ ॥
नासामुखे तथा नेत्रे हृदये नाभिमण्डले ।

स्थानेषु व्यङ्गिताङ्गेषु प्रतिमां नैव पूजयेत् ॥ २० ॥
मण्डलं जालकं स्फोटं तिलकं शूलकं तथा ।
.. वज्रा तु सन्धिश्च महा-दोषः प्रकीर्त्तितः ॥ २१ ॥
वर्जयेदर्हतः पृष्ठिं पार्श्वं ब्रह्ममधुद्विषोः ।
चंडिकासूर्ययो दृष्टिं सर्वमेव च शूलिनः ॥ २२ ॥
विभज्य नवधा द्वारं तत्षट् भागानधस्त्यजेत् ।
ऊर्ध्वे द्वौ सप्तमं तद्वद् विभज्य स्थापयेद् दृशम् ॥२३॥
विश्वकर्ममते प्रोक्तं प्रतिमा दृष्टि लक्षणम् ।
द्वादशास्वाष्टिभिर्भागैरधः पक्षा द्वितीयके ? ॥ २४ ॥
मुक्त्वाऽष्टमं विभागं च यो भागः सप्तमः पुनः ।
तस्यापि सप्तमे भागे गर्जांशस्तत्र सम्भवेत् ॥ २५ ॥
प्रासादः प्रतिमा दृष्टिः नियोज्या तत्र शिल्पिभिः ।
अस्थाने निहिता सा तु सद्यो रिष्टाय जायते ॥ २६॥
दृष्ट्यायत्तं फलं सर्वं प्रोक्तं श्रीविश्वकर्मणा ।
तस्मात् सर्वं प्रयत्नेन तत्र यत्नो विधीयताम् ॥२७॥

॥ इति बिम्ब पूजा स्वरूपम् ॥

# प्रतिमार्थं काष्ठपाषाणपरीक्षा

निर्मलेनारनालेन विष्टया श्रीफले न वा ।
विलिप्तेऽश्मनी काष्ठे वा प्रकटं मङ्गलं भवेत् ॥ १ ॥

मधुभस्म गुण व्योम—कपोतसदृशप्रभैः ।
माञ्जिष्टैररुणैः प्रोतिः कपिलैः शामलैरपि ॥ २ ॥

चित्रैश्च मण्डलैरेभिरन्तर्ज्ञेया यथा क्रमम् ।
खद्योतो वालुकारक्तभेकाम्बुगृहगोधिका ॥ ३ ॥

॥ इति काष्ठपाषाणपरीक्षा ॥

श्रीसत्यविजयस्मारकजैनग्रन्थमाला तरफथी—

## प्रसिद्ध थयेला पुस्तको

अमारा भेटना पुस्तको मंगाववनारे ते ठेकाणे लखेली पोस्टनो टीकीट मोकलवी.

| | | पोस्टनी टीकीट. |
|---|---|---|
| १ संयमश्रेणिगर्भित महावीरस्तवन. | भेट | ०-०-६ |
| २ जम्बूद्वीपप्रमास सटीक. | भेट | ०-०-६ |
| ३ उपधानविधि पत्राकारे. | भेट | ०-२-० |
| ४ अन्ययोगव्यवच्छेदद्वात्रिंशिका अवचूरि स. | भेट | ०-१-० |
| ५ पांडवचरित्र महाकाव्य पत्राकारे. रु. १-४-० | | |
| ६ षष्ठिशतकप्रकरण सटीक. मूल कर्ता नेमिचंद्र. टीकाकार महोपाध्याय गुणरत्नगणि. | भेट | ०-६-० |
| ७ सत्यहरिश्चन्द्रप्रबन्ध पत्राकारे. | भेट | ०-३-० |
| ८ जिनगुणस्तवनावली. सा० भेट. | गृहस्थ | ०-४-० |
| ९ पोसहविधि. | भेट | ०-१-० |
| १० उपदेशरत्नकोषादि | | ०-०-६ |
| ११ अम्बडचरित्रपद्य | | ०-३-० |

—: मलवानुं ठेकाणु :—

श्री सत्यविजय जैनग्रन्थमालाना ओ० सेक्रेटरी—

**शा. मोहनलाल डाह्याभाइ**

ठे. पांचकुवा कापडबजार पारसीचाल-अमदावाद.

Printed by Shah Vadilal Bapubhai at Jain Advocate Printing Press Ghee Kanta. AHMEDABAD.